# ॥ બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૭૧-૮૦ ॥

.. bRihatpArAsharahorAshAstram.h 71-80 ..

sanskritdocuments.org

August 2, 2016

# .. bRihatpArAsharahorAshAstram.h 71-80 ..

# ॥ બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૭૧-૮૦ ॥

Document Information

Text title : bRihatpArAsharahorAshAstram.h 71-80
File name : par7180.itx
Category : jyotiSha
Location : doc_z_misc_sociology_astrology
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Ahto Jarve ajarve at fms30.cca.rockwell.com
Proofread by : Ahto Jarve ajarve at fms30.cca.rockwell.com
Latest update : November 1, 2010
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

sanskritdocuments.org

# ॥ બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૭૧-૮૦ ॥

---

## અથાઽષ્ટવર્ગાયુર્દાયાધ્યાયઃ ॥ ૭૧॥

અથાત્રાયુઃ પ્રવક્ષ્યેઽહમષ્ટવર્ગસમુદ્ભવમ્ ।
દિનદ્વયં વિરેખાયાં રેખાયાં સાર્ધવાસરમ્ ॥ ૧॥

દિનમેકં દ્વિરેખાયાં ત્રિરખાયાં દિનાર્ધકમ્ ।
વેદતુલ્યાસુ રેખાસુ સાર્ધસપ્તદિનં સ્મૃતમ્ ॥ ૨॥

દ્વિવર્ષં પઞ્ચરેખાસુ ષડ્રેખાસુ ચતુઃસમા ।
ષડ્વર્ષં સપ્તરેખાસુ વસવોઽષ્ટાસુ વત્સરાઃ ॥ ૩॥

એવં યદાગતાયુઃ સ્યાત્ સર્વખેટસમુદ્ભવમ્ ।
તદર્ધં સ્ફુટમાયુઃ સ્યાદષ્ટવર્ગભવં નૃણામ્ ॥ ૪॥

---

## અથ સમુદાયાષ્ટકવર્ગાધ્યાયઃ ॥ ૭૨॥

દ્વાદશારં લિખેચ્ચક્રં જન્મલગ્નાદિભૈર્યુતમ્ ।
સર્વાષ્ટકફલાન્યત્ર સંયોજ્ય પ્રતિભં ન્યસેત્ ॥ ૧॥

સમુદાયાભિધાનોઽયમષ્ટવર્ગઃ પ્રકથ્યતે ।
અતઃ ફલાનિ જાતાનાં વિજ્ઞેયાનિ દ્વિજોત્તમ ॥ ૨॥

ત્રિંશાધિકફલા યે સ્યૂ રાશયસ્તે શુભપ્રદાઃ ।
પઞ્ચવિંશાદિત્રિંશાન્તફલા મધ્યફલા સ્મૃતાઃ ॥ ૩॥

અતઃ ક્ષીણફલા યે તે રાશયઃ કષ્ટદુઃખદા ।
શુભે શ્રેષ્ઠફલાન્ રાશીન્ યોજયેન્મતિમાન્નરઃ ॥ ૪॥

કષ્ટરાશીન્ સુકાર્યેષુ વર્જયેદ્ દ્વિજસત્તમ ।
શ્રેષ્ઠરાશિગતઃ ખેટઃ શુભોઽન્યત્રાઽશુભપ્રદઃ ॥ ૫॥

તન્વાદિવ્યયપર્યન્તં દૃષ્ટ્વા ભાવફલાનિ વૈ ।
અધિકે શોભનં જ્ઞેયં હીને હાનિં વિનિર્દિશેત્ ॥ ૬॥

મધ્યે મધ્યફલં બ્રૂયાદ્ તત્તદ્ભાવસમુદ્ભવમ્ ।
મધ્યાત્ ફલાધિકે લાભો લાભાત્ ક્ષીણગતોવ્યયઃ ॥ ૭॥

લગ્નં ફલાધિકં યસ્ય ભોગવાનર્થવાન્ હિ સઃ ।
વિપરીતેન દારિદ્ર્યં ભવત્યેવ ન સંશયઃ ॥ ૮॥

દશાવદિહ ભાવાનાં કૃત્વા ખંડત્રયં બુધઃ ।
પશ્યેત્ પાપસમારૂઢં ખંડે કષ્ટકરં વદેત્ ॥ ૯॥

સૌમ્યૈર્યુક્તં શુભં બ્રૂયાન્મિશ્રૈર્મિશ્રફલં યથા ।
ક્રમાદ્ બાલ્યાદ્યવસ્થાસુ ખંડત્રયફલં વદેત્ ॥ ૧૦॥

રેખાભિઃ સપ્તભિર્યુક્તે માસેમૃત્યુભયં નૃણામ્ ।
સુવર્ણં વિંશતિપલં દદ્યાત્ દ્વૌ તિલપર્વતૌ ॥ ૧૧॥

રેખાભિરષ્ટભિર્યુક્તે માસે મૃત્યુબશો નરઃ ।
અસત્ફલવિનાશાય દદ્યાત્ કર્પૂરજાં તુલામ્ ॥ ૧૨॥

રેખાભિર્મવભિયુક્તે માસે સર્પભયં વદેત્ ।
અશ્વૈશ્ચતુર્ભિઃ સંયુક્તં રથં દદ્યાચ્છુભાપ્તયે ॥ ૧૩॥

રેખાભિર્દશભિર્યુક્તે માસે શસ્ત્રભયં તથા ।
દદ્યાચ્છુભફલાવાપ્ત્યૈ કવચં વજ્રસંયુતમ્ ॥ ૧૪॥

અભિશાપભયં યત્ર રેખા રુદ્રસમા દ્વિજ ।
દિક્પલસ્વર્ણઘટિતાં પ્રદદ્યાત્ પ્રતિમાં વિધોઃ ॥ ૧૫॥

યુક્તે દ્વાદશરેખાભિર્જલે મૃત્યુભયં વદેત્ ।
સશસ્યભૂમિઃ વિપ્રાય દત્વા શુભફલં ભવેત્ ॥ ૧૬॥

વિશ્વપ્રમિતરેખાભિર્વ્યાઘ્રાન્મૃત્યુભયં તથા ।
વિષ્ણોર્હિરણ્યગર્ભસ્ય દાનં કુર્યાચ્ચુભાપ્તયે ॥ ૧૭॥

શત્રપ્રમિતરેખાભિર્યુક્તે માસે મૃતેર્ભયમ્ ।
વરાહપ્રતિમાં દદ્યાત્ કનકેન વિનિર્મિતામ્ ॥ ૧૮॥

તિથિતિશ્ચ નૃપાદ્ ભીતિર્દદ્યાત્ તત્ર ગજં દ્વિજ ।
રિષ્ટં ષોડશભિર્દદ્યાત્ મૂર્તિં કલ્પતરોસ્તથા ॥ ૧૯॥

સપ્તેન્દુભિર્વ્યાધિભયં દદ્યાત્ ધેનું ગુડં તથા ।
કલહોઽષ્ટેન્દુભિર્દદ્યાદ્ રત્નગોભૂરિરણ્યકમ્ ॥ ૨૦॥

અઙ્કેન્દુભિઃ પ્રવાસઃ સ્યાચ્છાન્તિં કુર્યાદ્ વિધાનતઃ ।
વિંશત્યા બુદ્ધિનાશઃ સ્યાદ્ ગણેશં તત્ર પૂજયેત્ ॥ ૨૧॥

રોગપીડૈકવિંશત્યા દદ્યાદ્ ધાન્યસ્ય પર્વતમ્ ।
યમાશ્વિભિર્બન્ધુપીડા દદ્યાદાદર્શકં દ્વિજ ॥ ૨૨॥

ત્રયોવિંશત્રિસંયુક્તે માસે ક્લેશમવાપ્નુયાત્ ।
સૌવર્ણીં પ્રતિમાં દદ્યાદ્રવેઃ સપ્તપલૈર્બુધઃ ॥ ૨૩॥

વેદાશ્વિભિર્બન્ધુહીનો દદ્યાદ્ ગિદશકં નૃપઃ ।
સર્વરોગવિનાશાર્થં જપહોમાદિકં ચરેત્ ॥ ૨૪॥

ધીહાનિઃ પઞ્ચવિંશત્યા પૂજ્યા વાગીશ્વરી તદા ।
ષડ્વિંશત્યાઽર્થહાનિઃ સ્યાત્ સ્વર્ણં દદ્યાદ્વિચક્ષણઃ ॥ ૨૫॥

તથા ચ સપ્તવિંશત્યા શ્રીસુક્તં તત્ર સંજપેત્ ।
અષ્ટવિંશતિસંયુક્તે માસે માસે હાનિશ્ચ સર્વથા ॥ ૨૬॥

સૂર્યહોમશ્ચ વિધિના કર્ત્તવ્યઃ શુભકાંક્ષિભિઃ ।
એકોનત્રિંશતા ચાપિ ચિન્તવ્યાકુલિતો ભવેત્ ॥ ૨૭॥

ઘૃતવસ્ત્રસુવર્ણાનિ તત્ર દદ્યાત્ વિચક્ષણઃ ।
ત્રિંશતા પૂર્ણધાન્યાપ્તિરિતિ જાતકનિર્ણયઃ ॥ ૨૮॥

ત્રિંશાધિકામી રેખાભિર્ધનપુત્રસુખાપ્તયઃ ।
ચત્વારિંશાધિકાભિશ્ચ પુણ્યશ્રીરુપચીયતે ॥ ૨૯॥

અષ્ટવર્ગેણ યે શુદ્ધાસ્તે શુદ્ધાઃ સર્વકર્મસુ ।
અતોઽષ્ટવર્ગસંશુદ્ધિરનેષ્યા સર્વકર્મસુ ॥ ૩૦॥

તાવદ્ગોચરમન્વેષ્યં યાવન્ન પ્રાપ્યતેઽષ્ટકમ્ ।
અષ્ટવર્ગે તુ સમ્પ્રાપ્તે ગોચરં વિફલં ભવેત્ ॥ ૩૧॥

## અથ રશ્મિફલાધ્યાયઃ ॥ ૭૩ ॥

અથ રશ્મીન્ પ્રવક્ષ્યામિ ગ્રહાણાં દ્વિજસત્તમ ।
દિન્ નવેષ્વિષુસપ્તાષ્ટશરાઃ સ્વોચ્ચે કરો રવેઃ ॥ ૧॥

નીચ ખં ચાન્તરે પ્રોક્તા રશ્મયશ્ચાનુપાત્તઃ ।
નીચોનં તુ ગ્રહં ભાર્ધાધિકં ચક્રાદ્વિશોધયેત્ ॥ ૨॥

સ્વીયરશ્મિહતં ષડ્ભિર્ભજેત્ સ્યૂ રશ્મયઃ સ્વકાઃ ।
અપરૈરત્ર સંસ્કારવિશેષઃ કથિતો યથા ॥ ૩ ॥

સ્વોચ્ચભે તે ત્રિગુણિતાઃ સ્વત્રિકોણે દ્વિસંગુણાઃ ।
સ્વમે ત્રિઘ્ના દ્વિસંભક્તા અધિમિત્રગૃહે તથા ॥ ૪॥

વેદઘ્ના રામસંભક્તા મિત્રમે ષડ્ગુણાસ્તતઃ ।
પઞ્ચભક્તાસ્તથા શત્રુગૃહે ચેદ્ દલિતાઃ કરાઃ ॥ ૫॥

અધિશત્રુગૃહે દ્વિઘ્નાઃ પઞ્ચભક્તાઃ સમે સમાઃ ।

શનિશુક્રૌ વિના તારાગ્રહા અસ્તે ગતા યદિ ॥ ૬॥

વિરશ્મયો ભવન્ત્યેવં જ્ઞેયાઃ સ્પષ્ટકરા દ્વિજ ।
રશ્મિયોગવશાદેવં ફલં વાચ્યં વિચક્ષણૈઃ ॥ ૭॥

એકાદિ પઞ્ચપર્યન્તં રશ્મિસંખ્યા ભવેદ્યદિ ।
દરિદ્રા દુઃખસંતપ્તા અપિ જાતાઃ કુલોત્તમે ॥ ૮॥

પરતો દશકં યાવત્ નિર્ધના ભારવાસકાઃ ।
સ્ત્રીપુત્રગૃહહીનાશ્ચ જાયન્તે મનુજા ભુવિ ॥ ૯॥

અકાદશસ્વલ્પપુત્રાઃ સ્વલ્પવિત્તાશ્ચ માનવાઃ ।
દ્વાદશસ્વલ્પવિત્તાશ્ચ ધૂર્તા મૂર્ખાશ્ચ નિર્બલાઃ ॥ ૧૦॥

ચૌર્યકર્મરતા નિત્યં ચેત્ ત્રયોદશ રશ્મયઃ ।
ચતુર્દશસુ ધર્માત્મા કુટુમ્બાનાં ચ પોષકાઃ ॥ ૧૧॥

કુલોચિતક્રિયાસક્તો ધનવિદ્યાસમન્વિતઃ ।
રશ્મિભિઃ પઞ્ચદશભિઃ સર્વવિદ્યાગુણાન્વિતઃ ॥ ૧૨॥

સ્વવંશમુખ્યો ધનવાનિત્યાહ ભગવાન્ વિધિઃ ।
પરતશ્ચ કુલેશાના બહુભૃત્યા કુટુમ્બિનઃ ॥ ૧૩ ॥

કીર્તિમન્તો જનૈઃ પૂર્ણાઃ સર્વે ચ સુખિનઃ ક્રમાત્ ।
પઞ્ચાશજ્જનપાલશ્ચેદેકવિંશતિરશ્મયઃ ॥ ૧૪॥

દાનશીલઃ કૃપાયુક્તો દ્વાવિંશતિસુરશ્મિષુ ।
સુખયુક્ સૌમ્યશીલશ્ચેત્ ત્રયોવિંશતિરશ્મયઃ ॥ ૧૫॥

આત્રિંશત્ પરતઃ શ્રીમાન્ સર્વસત્ત્વસમન્વિતઃ ।
રાજપ્રિયશ્ચ તેજસ્વી જનૈશ્ચ બહુભિર્વૃતઃ ॥ ૧૬॥

અત ઊર્ધ્વં તુ સામન્તશ્ચત્વારિંશત્ કરાવધિ ।
જનાનાં શતમારબ્ય સહસ્રાવધિપોષકઃ ॥ ૧૭॥

અત ઊર્ધ્વન્તુ ભૂપાલઃ પંચાશત્ કરિણાવધિ ।
તત ઊર્ધ્વકરૈર્વિપ્ર ચક્રવર્તી નૃપો ભવેત્ ॥ ૧૮॥

એવં પ્રસૂતિકાલોત્થનભોગકરસમ્ભવમ્ ।
કુલક્રમનુસારેણ જાતકસ્ય ફલં વદેત્ ॥ ૧૯॥

ક્ષત્રિયશ્ચક્રવર્તી વૈશ્યો રાજા પ્રજાયતે ।
શૂદ્રશ્ચ સધનો વિપ્રો યજ્ઞકર્મક્રિયારતઃ ॥ ૨૦॥

ઉચ્ચાભિમુખખેટસ્ય કરાઃ પુષ્ટફલપ્રદાઃ ।

નીચાભિમુખખેટસ્ય તતો ન્યૂનફલપ્રદાઃ ॥ ૨૧॥

સર્વેષામેવ ખેટાનામેવં રશ્મિવશાદ્દ્વિજ ।
શુભં વાઽપ્યશુભં ચાપિ ફલં ભવતિ દેહિનામ્ ॥ ૨૨॥

રશ્મિજ્ઞાનં વિના સમ્યક્ ન ફલં જ્ઞાતુમર્હતિ ।
તસ્માદ્રશ્મીન્ પ્રસાધ્યૈવ ફલં વાચ્યં વિચક્ષણૈઃ ॥ ૨૩ ॥

---

અથ સુદર્શનચક્રફલાધ્યાયઃ ॥ ૭૪॥

અથોચ્યતે મયા વિપ્ર રહસ્યં જ્ઞાનમુત્તમમ્ ।
જગતામુપકારાય યત્ પ્રોક્તં બ્રહ્મણ સ્વયમ્ ॥ ૧॥

ચક્રં સુદર્શનં નામ યદ્વશાત્ પ્રસ્ફુટં ફલમ્ ।
નૃણાં તન્વાદિભાવાનાં જ્ઞાતું શક્નોતિ દૈવવિત્ ॥ ૨॥

જન્મતો મૃત્યુપર્યન્તં વર્ષમાસદિનોદ્ભવમ્ ।
શુભં વાઽપ્યશુભં સર્વં તચ્છૃણુષ્વૈકમાનસઃ ॥ ૩ ॥

એકકેન્દ્રોદ્ભવં રમ્યં લિખેદ્ વૃત્તત્રયં દ્વિજ ।
દ્વાદશારં ચ તત્ કુર્યાદ્ ભવેદેવં સુદર્શનમ્ ॥ ૪॥

તત્રાદ્યવૃત્તે લગ્નાદ્યા ભાવા લેખ્યાઃ સખેચરાઃ ।
તદૂર્ધ્વવૃત્તે ચન્દ્રાચ્ચ ભવાઃ ખેટસમન્વિતાઃ ॥ ૫॥

તદૂર્ધ્વવૃત્તે સૂર્યાચ્ચ ક્રમાત્ ભવા ગ્રહાન્વિતાઃ ।
એવમેકૈકભાવેઽત્ર ભવેદ્ભાનાં ત્રયં ત્રયમ્ ॥ ૬॥

અત્ર તુ પ્રથમો ભાવો લગ્નેન્દુરવિભિર્યુતઃ ।
તં પ્રકલ્પ્ય તનું ત્વગ્રે જ્ઞેયા ભાવા ધનાદયઃ ॥ ૭॥

તત્ર તત્ર ગ્રહસ્થિત્યા જ્ઞેયં તત્તત્ફલં બુધૈઃ ।
તનુભાવે શુભઃ સૂર્યો જ્ઞેયોઽન્યત્રાશુભપ્રદઃ ॥ ૮॥

પાપોઽપિ સ્વોચ્ચરાશિસ્થો ન ભવત્યશુભપ્રદઃ ।
એવં શુભાઽશુભં દૃષ્ટ્વા તત્તદ્ભાવફલં વદેત્ ॥ ૯॥

યો ભાવઃ સ્વામિસૌમ્યાભ્યાં યુક્તો દૃષ્ટોઽયમેધતે ।
પાપૈર્દૃષ્ટો યુતો યો વા તસ્ય હાનિઃ પ્રજાયતે ॥ ૧૦॥

જ્ઞેયં સગ્રહભાવસ્ય ગ્રહયોગસમં ફલમ્ ।
અગ્રહસ્ય તુ ભાવસ્ય ગ્રહદૃષ્ટિસમં ફલમ્ ॥ ૧૧॥

શુભૈરેવ શુભં પાપૈર્શુભં મિશ્રખેચરૈઃ ।

શુભાધિકે શુભં જ્ઞેયમશુભં ત્વશુભાધિકે ॥ ૧૨॥

એવં ભાવેષુ ખેટાનાં યોગં દૃષ્ટિં વિલોક્ય ચ ।
તારતમ્યેન વાચ્યાનિ ફલાનિ દ્વિજસત્તમ ॥ ૧૩ ॥

યત્ર નૈવ ગ્રહઃ કશ્ચિન્ન દૃષ્ટિ કસ્યચિદ્ ભવેત્ ।
તદા તદ્ભાવજં જ્ઞેયં તત્સ્વામિવશતઃ ફલમ્ ॥ ૧૪॥

શુભોઽપિ શુભવર્ગેષુ હ્યધિકેષ્વશુભપ્રદઃ ।
પાપોઽપિ શુભવર્ગેષુ હ્યધિકેષુ શુભપ્રદઃ ॥ ૧૫॥

સ્વભોચ્ચસ્ય શુભસ્યાત્ર વર્ગા જ્ઞેયાઃ શુભવાહાઃ ।
શત્રોઃ ક્રૂરસ્ય નીચસ્ય ષડ્વર્ગા અશુભપ્રદાઃ ॥ ૧૬॥

એવં સર્વેષુ ખેટેષુ ભવેષ્વપિ દ્વિજોત્તમ ।
શુભાશુભત્વં સચ્ચિન્ત્ય તતસ્તત્ફલમાદિશેત્ ॥ ૧૭॥

યદા સુદર્શનાદેવ ફલં સિદ્ધ્યતિ દેહનામ્ ।
તદા કિં મુનિભિઃ સર્વૈર્લગ્નાદેવ ફલં સ્મૃતમ્ ॥ ૧૮॥

ઇતિ મ સંશયો જાતસ્તં છેત્તુમર્હતિ ।
પૃથગ્ભગૌ યદાઽર્કેન્દૂ લગ્નાદન્યત્ર સંસ્થિતૌ ॥ ૧૯॥

તદા સુદર્શનાચ્ચક્રાત્ ફલં વાચ્યં વિચક્ષણૈઃ ।
એકભે દ્વૌ ત્રયો વા ચેત્ તદા લગ્નાત્ ફલં વદેત્ ॥ ૨૦॥

અથ વિપ્ર પ્રવક્ષ્યેઽહં પ્રતિવર્ષાદિજં ફલમ્ ।
અસ્માત્ સુદર્શનાદેવ દશાન્તરદશાવશાત્ ॥ ૨૧॥

તન્વાદ્યૈર્વર્ષમાસ્સાર્ધદ્વિકધસ્રાન્ પ્રવર્તયેત્ ।
ભવેશાદિદ્વાદશાનાં દશા વર્ષેષુ કલ્પયેત્ ॥ ૨૨॥

તદાદ્યન્તર્દશાસ્તદ્વન્માસાદૌ તદ્બલૈઃ ફલમ્ ।
તં તં ભાવં પ્રકલ્પ્યાઙ્કં તત્તત્તન્વાદિજં દ્વિજ ॥ ૨૩ ॥

તત્ તલ્લગ્નાત્ કેન્દ્રકોણાષ્ટમે સૌમ્યાઃ શુભપ્રદાઃ ।
યત્ર ભાવે સૈંહિકેયો ભવેત્ તદ્ભાવહાનિકૃત્ ॥ ૨૪॥

પાપા વા યત્ર બહવસ્તત્તદ્ભાવવિનાશનમ્ ।
વિરિષ્ફારિશુભૈઃ પાપૈસ્ત્રિષડાયસ્થિતૈઃ શુભમ્ ॥ ૨૫॥

એવં પ્રત્યબ્દમાસાદૌ ભાવાનાં ફલચિન્તનમ્ ।
દ્વાદશાનાં દશાઽવૃત્ત્યા દશાશ્ચાયુષિ ચિન્તયેત્ ॥ ૨૬॥

એવં સુદર્શનાચ્ચક્રાદ્ વર્ષમાસાદિજં ફલમ્ ।

જ્ઞાત્વા તથાષ્ટવર્ગોત્થમુભાભ્યાં ફલનિર્ણયઃ ॥ ૨૭॥

ઉભયત્ર સમત્વે હિ સમ્પૂર્ણં તત્ ફલં વદેત્ ।
વિષમત્વે યદાધિક્યં તત્ફલં ચ બલક્રમાત્ ॥ ૨૮॥

---

અથ પંચમહાપુરુષલક્ષણાધ્યાયઃ ॥ ૭૫॥

અથ વક્ષ્યામ્યહં પઞ્ચમહાપુરુષલક્ષણમ્ ।
સ્વભોચ્ચગતકેન્દ્રસ્થૈર્બલિભિશ્ચ કુજાદિભિઃ ॥ ૧॥

ક્રમશો રુચકો ભદ્રો હંસો માલવ્ય એવ ચ ।
શશશ્ચૈતે બુધૈઃ સર્વૈર્મહાન્તઃ પુરુષાઃ સ્મૃતાઃ ॥ ૨॥

દીર્ઘાનનો મહોત્સાહો સ્વચ્છકાન્તિર્મહાબલઃ ।
ચારુભ્રૂર્નીલકેશશ્ચ સુરુચિશ્ચ રણપ્રિયઃ ॥ ૩॥

રક્તશ્યામોઽરિહન્તા ચ મન્ત્રવિચ્ચોરનાયકઃ ।
ક્રૂરોભર્તા મનુષ્યાણાં ક્ષામાઽઙ્ઘ્રિર્દ્વિજપૂજકઃ ॥ ૪॥

વીણાવજ્રધનુઃપાશવૃષચક્રાઙ્કિતઃ કરે ।
મન્ત્રાભિચારકુશલી દૈર્ઘ્યે ચૈવ શતાંગુલઃ ॥ ૫॥

મુખદૈર્ઘ્યસમં મધ્યં તસ્ય વિજ્ઞૈઃ પ્રકીર્તિતમ્ ।
તુલ્યસ્તુલાસહસ્રેણ રુચકો દ્વિજપુઙ્ગવ ॥ ૬॥

ભુનક્તિ વિન્ધ્યસહ્યાદ્રિપ્રદેશં સપ્તતિં સમાઃ ।
શત્રેણ વહ્નિના વાપિ સ પ્રયાતિ સુરાલયમ્ ॥ ૭॥

શાર્દૂલપ્રતિભદ્ પીનવક્ષા ગજગતિઃ પુમાન્ ।
પીનાજાનુભુજઃ પ્રાજ્ઞશ્ચતુરસ્રશ્ચ યોગવિત્ ॥ ૮॥

સાત્ત્વિકઃ શોભનાંઘ્રશ્ચ શોભનશ્મશ્રુસંયુતઃ ।
કામી શઙ્ખગદાચક્રશરકુઞ્જરચિહ્નકૈઃ ॥ ૯॥

ધ્વજલાઙ્ગલચિહ્નૈશ્ચ ચિહ્નિતાંઘ્રિકરામ્બુજઃ ।
સુનાસશ્શાસ્ત્રવિદ્ ધીરઃ કૃષ્ણાકુઞ્ચિતકેશભૃત્ ॥ ૧૦॥

સ્વતન્ત્રઃ સર્વકાર્યેષુ સ્વજનપ્રીણનક્ષમઃ ।
ઐશ્વર્યં ભુજ્યતે ચાસ્ય નિત્યં મિત્રજનૈઃ પરૈઃ ॥ ૧૧॥

તુલયા તુલિતો ભારપ્રમિતઃ સ્ત્રીસુતાન્વિતઃ ।
સક્ષેમો ભૂપતિઃ પાતિ મધ્યદેશં શતં સમાઃ ॥ ૧૨॥

હંસો હંસસ્વરો ગૌરઃ સુમુખોન્નતનાસિકઃ ।
શ્લેષ્મલો મધુપિઙ્ગાક્ષો રક્તવર્ણનખઃ સુધીઃ ॥ ૧૩ ॥

પીનગણ્ડસ્થલો વૃત્તશિરાઃ સુચરણો નૃપઃ ।
મત્સ્યાઽઙ્કુશધનુઃશંખકઞ્જખટ્વાઙ્ગચિહ્નકૈઃ ॥ ૧૪॥

ચિહ્નતાંઘ્રિકરઃ સ્ત્રીષુ કામાર્તો નૈતિ તુષ્ટતામ્ ।
ષણ્ણવત્યંગુલો દૈર્ઘ્યે જલક્રીડારતઃ સુખી ॥ ૧૫॥

ગઙ્ગાયમુનયોર્મધ્યદેશં પાતિ શતં સમાઃ ।
વનાન્તે નિધનં યાતિ ભુક્ત્વા સર્વસુખં ભુવિ ॥ ૧૬॥

સમૌષ્ઠઃ કૃશમધ્યશ્ચ ચન્દ્રકાન્તિરુચિઃ પુમાન્ ।
સુગન્ધો નાતિરક્તાઙ્ગો ન હ્રસ્વો નાતિદીર્ઘકઃ ॥ ૧૭॥

સમસ્વચ્છરદો હસ્તિનાદ આજાનુબાહુધૃક્ ।
મુખં વિશ્વાંગુલં દૈર્ઘ્યે વિસ્તારે ચ દશાઙ્ગુલમ્ ॥ ૧૮॥

માલવ્યો માલવાખ્યં ચ દેશં પાતિ સસિન્ધુકમ્ ।
સુખં સપ્તતિવર્ષાન્તં ભુક્ત્વા યાતિ સુલાલયમ્ ॥ ૧૯॥

તનુદ્વિજમુખઃ શૂરો નાતિહ્રસ્વઃ કૃશોદરઃ ।
મધ્યે ક્ષામઃ સુજંઘશ્ચ મતિમાન્ પરરન્ધ્રવિત્ ॥ ૨૦॥

શક્તો વનાદ્રિદુર્ગેષુ સેનાનીર્દન્તુરઃ શશઃ ।
ચંચલો ધાતુવાદી ચ સ્ત્રીશક્તોઽન્યધાનાન્વિતઃ ॥ ૨૧॥

માલાવીણામૃદઙ્ગાઽસ્ત્રરેખાઙ્કિતકરાંઘ્રિકઃ ।
ભૂપોઽયં વસુધા પાતિ જીવન્ ખાદ્રિસમાઃ સુખી ॥ ૨૨॥

## અથ પંચમહાભૂતફલાધ્યાયઃ ॥ ૭૬॥

અથ પઞ્ચમહાભૂતચ્છાયાજ્ઞાનં વદામિ તે ।
જ્ઞાયતે યેન ખેટાનાં વર્તમાનદશા બુધૈઃ ॥ ૧॥

શિખિભૂખામ્બુવાતાનામધિપા મઙ્ગલાદયઃ ।
તત્તદ્બલાવશાજ્જ્ઞેયં તત્તદ્ભૂતભવં ફલમ્ ॥ ૨॥

સબલે મઙ્ગલે વહ્નિસ્વભાવો જાયતે નરઃ ।
બુધે મહીસ્વભાવઃ સ્યાદાકાશપ્રકૃતિર્ગુરૌ ॥ ૩॥

શુક્રે જલસ્વભાવશ્ચ મારુતપ્રકૃતિઃ શનૌ ।
મિશ્રૈર્મિશ્રસ્વભાવશ્ચ વિજ્ઞેયો દ્વિજસત્તમ ॥ ૪॥

સૂર્યે વહ્નિસ્વભાવશ્ચ જલપ્રકૃતિકો વિધૌ ।
સ્વદશાયાં ગ્રહાશ્છાયાં વ્યંજયન્તિ સ્વભૂતજામ્ ॥ ૫॥

ક્ષુધાર્તશ્ચપલઃ શૂરઃ કૃશઃ પ્રાજ્ઞોऽતિભક્ષણઃ ।
તીક્ષ્નો ગૌરતનુર્માની વહ્નિપ્રકૃતિકો નરઃ ॥ ૬॥

કર્પૂરોત્પલગ‍ન્ધાઢ્યોભોગી સ્થિરસુખી બલી ।
ક્ષમાવાન્ સિંહનાદશ્ચ મહીપ્રકૃતિકો નરઃ ॥ ૭॥

શબ્દાર્થવિત્ સુનીતિજ્ઞો પ્રગલ્ભો જ્ઞાનસંયુતઃ ।
વિવૃતાસ્યોऽતિદીર્ઘશ્ચ વ્યોમપ્રકૃતિસમ્ભવઃ ॥ ૮॥

કાન્તિમાન્ ભારવાહી ચ પ્રિયવાક્ પૃથિવીપતિઃ ।
બહુમિત્રા મૃદુર્વિદ્વાન્ જલપ્રકૃતિસમ્ભવઃ ॥ ૯॥

વાયુતત્ત્વાધિકો દાતા ક્રોધી ગૌરોऽટનપ્રિયઃ ।
ભૂપતિશ્ચ દુરાધર્ષઃ કૃશાઙ્ગો જાયતે જનઃ ॥ ૧૦॥

સ્વર્ણદીપ્તિઃ શુભા દૃષ્ટિઃ સર્વકાર્યાર્થસિદ્ધિતા ।
વિજયો ધનલાભશ્ચ વહ્નિભાયાં પ્રજાયતે ॥ ૧૧॥

ઇષ્ટગન્ધઃ શરીરે સ્યાત્ સુસ્નિગ્ધનખદન્તતા ।
ધર્માર્થસુખલાભશ્ચ ભૂમિચ્છાયા યદા ભવેત્ ॥ ૧૨॥

સ્વચ્ચા ગગનજા છાયા વાક્પટુત્વપ્રદા ભવેત્ ।
સુશબ્દશ્રવણોદ્ભૂતં સુખં તત્ર પ્રજાયતે ॥ ૧૩॥

મૃદુતા સ્વસ્થતા દેહે જલચ્છાયા યદા ભવેત્ ।
તદાऽભિષ્ટરસસ્વાદસુખં ભવતિ દેહિનઃ ॥ ૧૪॥

માલિન્યં મૂઢતા દૈત્યં રોગશ્ચ પવનોદ્ભવાઃ ।
તદા ચ શોકસન્તાપૌ વાયુચ્છાયા યદા ભવેત્ ॥ ૧૫॥

એવં ફલં બુધૈર્જ્ઞેયં સબલેષુ કુજાદિષુ ।
નિર્બલેષુ તથા તેષુ વક્તવ્યં વ્યત્યયાદ્ દ્વિજ ॥ ૧૬॥

નીચશત્રુભગૈશ્ચાપિ વિપરીતં ફલં વદેત્ ।
ફલાપ્તિરબલૈઃ ખેટૈઃ સ્વપ્નચિન્તાસુ જાયતે ॥ ૧૭॥

તદુષ્ટફલશાન્ત્યર્થમપિ ચાજ્ઞાતજન્મનામ્ ।
ફલપક્ત્યા દશા જ્ઞેયા વર્તમાના નભઃસદામ્ ॥ ૧૮॥

અથ સત્ત્વાદિગુણફલાધ્યાયઃ ॥ ૭૭॥

અથો ગુણવશેનાહં કથયામિ ફલં દ્વિજ ।
સત્ત્વગ્રહોદયે જાતો ભવેત્સત્ત્વાધિકઃ સુધીઃ ॥ ૧॥

રજઃખેટોદયે વિજ્ઞો રજોગુણસમન્વિતઃ ।
તમઃખેટોદયે મૂર્ખો ભવેજ્જાતસ્તમોऽધિકઃ ॥ ૨॥

ગુણસામ્યયુતો જાતો ગુણસામ્યખગોદયે ।
એવં ચતુર્વિધા વિપ્ર જાયન્તો જન્તવો ભુવિ ॥ ૩॥

ઉત્તમો મધ્યમો નીચ ઉદાસીન ઇતિ ક્રમાત્ ।
તેષાં ગુણાનહં વક્ષ્યે નારદારિપ્રભાષિતાન્ ॥ ૪॥

શમો દમસ્તપઃ શૌચં ક્ષાન્તિરાર્જવમેવ ચ ।
અલોભઃ સત્યવાદિત્વં જને સત્ત્વાધિકે ગુણાઃ ॥ ૫॥

શૌર્યં તેજો ધૃતિર્દાક્ષ્યં યુદ્ધે ચાપ્યપલાયનમ્ ।
સાધૂનાં રક્ષણં ચેતિ ગુણા જ્ઞેયા રજોऽધિકે ॥ ૬॥

લોભશ્ચાસત્યવાદિત્વં જાડ્યમાલસ્યમેવ ચ ।
સેવાકર્મપટુત્વંચ ગુણા એતે તમોऽધિકે ॥ ૭॥

કૃષિકર્મણિ વાણિજ્યે પટુત્વં પશુપાલને ।
સત્યાસત્યપ્રભાષિત્વં ગુણસામ્યે ગુણા ઇમે ॥ ૮॥

ગતૈશ્ચ લક્ષણૈર્લક્ષ્ય ઉત્તમો મધ્યમોऽધમઃ ।
ઉદાસીનશ્ચ વિપ્રેન્દ તં તત્કર્મણિ યોજયેત્ ॥ ૯॥

દ્વાભ્યામેકોऽધિકો યશ્ચ તસ્યાધિક્યં નિગદ્યતે ।
અન્યથા ગુણસામ્યં ચ વિજ્ઞેયં દ્વિજસત્તમ ॥ ૧૦॥

સેવ્યસેવકયોરેવં કન્યકાવરયોરપિ ।
ગુણૈઃ સદૃશયોરેવ પ્રીતિર્ભવતિ નિશ્ચલા ॥ ૧૧॥

ઉદાસીનોऽધમસ્યૈવમુદાસીનસ્ય મધ્યમઃ ।
મધ્યમસ્યોત્તમો વિપ્ર પ્રભવત્યાશ્રયો મુદે ॥ ૧૨॥

અતોऽવરા વરાત્ કન્ય સેવ્યતઃ સેવકોऽવરઃ ।
ગુણૈસ્તતઃ સુખોત્પત્તિરન્યથા હાનિરેવ હિ ॥ ૧૩॥

વીર્યં ક્ષેત્રં પ્રસૂતેશ્ચ સમયઃ સઙ્ગતિસ્તથા ।
ઉત્તમાદિગુણે હેતુર્બલવાનુત્તરોત્તરમ્ ॥ ૧૪॥

અતઃ પ્રસૂતિકાલસ્ય સદૃશો જાતકે ગુણઃ ।

જાયતે તં પરીક્ષ્યૈવ ફલં વાચ્યં વિચક્ષણૈઃ ॥ ૧૫॥

કાલઃ સૃજતિ ભૂતનિ પાત્યથો સંહરત્યપિ ।
ઇશ્વરઃ સર્વલોકાનામવ્યયો ભગવાન્ વિભુ ॥ ૧૬॥

તચ્છક્તિઃ પ્રકૃતિઃ પ્રોક્તા મુનિભિસ્ત્રિગુણાત્મિકા ।
તથા વિભક્તોઽવ્યક્તોઽપિ વ્યક્તો ભવતિ દેહિનામ્ ॥ ૧૭॥

ચતુર્ધાઽવયવાસ્તસ્ય સ્વગુણૈશ્ચ ચતુર્વિધઃ ।
જાયન્તે હ્યુત્તમો મધ્યે ઉદાસીનોઽધમઃ ક્રમાત્ ॥ ૧૮॥

ઉત્તમે તૂત્તમો જન્તુર્મધ્યેઽઙ્ગે ચ મધ્યમઃ ।
ઉદાસીને હ્યદાસીનો જાયતે ચાઽધમેઽધમઃ ॥ ૧૯॥

ઉત્તમાઙ્ગં શરિસ્તસ્ય મધ્યમાઙ્ગમુરઃસ્થલમ્ ।
જંઘાદ્વયૌદાસીનમધમં પદમુચ્યતે ॥ ૨૦॥

એવં ગુણવશાદેવ કાલભેદઃ પ્રજાયતે ।
જાતિભેદસ્તુ તદ્ભેદાજ્જાયતેઽત્ર ચરાચરે ॥ ૨૧॥

એવં ભગવતા સૃષ્ટં વિભુના સ્વગુણૈઃ સમમ્ ।
ચતુર્વિધેન કાલેન જગદેતચ્ચતુર્વિધમ્ ॥ ૨૨॥

---

અથ નષ્ટજાતકાધ્યાયઃ ॥ ૭૮॥

જન્મકાલવશાદેવં ફલં પ્રોક્તં ત્વયા મુને ।
યજ્જન્મસમયોઽજ્ઞાતો જ્ઞેયં તસ્ય ફલં કથમ્ ॥ ૧॥

શુભં વાઽપ્યશુભં વાપિ મનુજસ્ય પુરાકૃતમ્ ।
અસ્તિ કશ્ચિદુપાયશ્ચેત્ તં ભવાન્ વક્તુમર્હતિ ॥ ૨॥

સાધુ પૃષ્ટં ત્વયા વિપ્ર લોકાનુગ્રહમાનસા ।
કથયામિ તવ સ્નેહાત્ ફલમજ્ઞાતજન્મનામ્ ॥ ૩॥

વર્ષાયનર્તુમાસાર્ધતિથિનક્ષત્રભાદિષુ ।
યદજ્ઞાતં ચ તન્માનં જ્ઞાયતે પ્રશ્નલગ્નતઃ ॥ ૪॥

પ્રશ્નાઙ્ગદ્વાદશાંશર્ક્ષસ્થિતે જન્મ વદેત્ ગુરૌ ।
અયનં લગ્નપૂર્વાર્ધે સૌમ્યં યામ્યં પરાર્ધકે ॥ ૫॥

ઋતુર્લગ્નદૃકાણર્ક્ષસ્વામિભિઃ શશિરાદયઃ ।
શનિશુક્રકુજેન્દ્વજ્ઞજીવૈર્ગ્રીષ્મસ્તુ ભાનુના ॥ ૬॥

અયનર્તુવિરોધે તુ પરિવર્ત્યાઃ પરસ્પરમ્ ।

બુધચન્દ્ર સુરાચાર્યાઃ કુજશુક્રશનૈશ્ચરૈઃ ॥ ૭॥
માસો દૃકાણપૂર્વાર્ધૈર્પૂર્વોઽન્યસ્તુ પરાર્ધકે ।
અનુપાતાત્ તિથિર્જ્ઞેયા ભાસ્કરાંશસમા દ્વિજ ॥ ૮॥
તદ્વશાદિષ્ટકાલો યો જન્મકાલસમો હિ સઃ ।
તત્ર ગ્રહાંશ્ચ ભાવાંશ્ચ જ્ઞાત્વા તસ્ય ફલં વદેત્ ॥ ૯॥
ગુરુર્દ્વાદશભ્રવર્ષૈઃ પુનસ્તદ્રાશિગો ભવેત્ ।
તત્ કસ્મિન્ પર્યયો તસ્ય જ્ઞેયઃ સંવત્સરો મુને ॥ ૧૦॥
સંવસ્તરસ્ય સન્દેહે પ્રશ્નકર્તુર્દ્વિજોત્તમ ।
વયોઽનુમાનતસ્તત્ર દ્વાદશ દ્વાદશ ક્ષિપેત્ ॥ ૧૧॥
તત્રાપિ સંશયે જાતે ગુરુર્લગ્નત્રિકોણગઃ ।
કલ્પ્યો વયોઽનુમાનેન વત્સરઃ પૂર્વવત્ તતઃ ॥ ૧૨॥
જ્ઞાત્વા માસં સસૂર્યાંશં કાલજ્ઞાનં કથં ભવેત્ ।
ભગવન્નિતિ મે બ્રૂહિ લોકાનુગ્રહચેતસા ॥ ૧૩॥
સક્રાન્તેરિષ્ટસૂર્યાંશતુલ્યેઽહ્નિ દ્વિજસત્તમ ।
રવિરૌદયિકઃ સાધ્યસ્તસ્યેષ્ટાર્કસ્ય ચાન્તરમ્ ॥ ૧૪॥
કલીકૃત્ય સ્વષણ્નિઘ્નં સ્ફુટાર્કગતિભાજિતમ્ ।
લબ્ધંઘટ્યાદિમાનં યત્ તાવાન્ સૂર્યોદયાત્ પરમ્ ॥ ૧૫॥
પૂર્વં જન્મેષ્ટકાલો હિ ક્રમાજ્ જ્ઞેયો વિપશ્ચિતા ।
સાધિતૌદયિકાદર્કાદિષ્ટેઽર્કેઽનિકહીનકે ॥ ૧૬॥

---

## અથ પ્રવ્રજ્યાયોગાધ્યાયઃ ॥ ૭૯॥

અથ વિપ્ર પ્રવક્ષ્યામિ યોગં પ્રવ્રજ્યકાભિધમ્ ।
પ્રવ્રજન્તિ જના યેન સમ્પ્રદાયાન્તરં ગૃહાત્ ॥ ૧॥
ચતુરાદિભિરેકસ્થૈઃ પ્રવ્રજ્યા બલિભિઃ સમાઃ ।
રવ્યાદિભિસ્તપસ્વી ચ કપાલી રક્તવસ્ત્રભૃત્ ॥ ૨॥
એકદણ્ડી યતિશ્ચક્રધરો નિર્ગ્રન્થિકઃ ક્રમાત્ ।
જ્ઞેયા વીર્યાધિકસ્યૈવ સબલેષુ બહુષ્વપિ ॥ ૩॥
સૂર્યેણાઽસ્તં ગતાસ્તે ચેદપિ વીર્યસમન્વિતાઃ ।
અદીક્ષિતાસ્તદા જ્ઞેયા જનાસ્તદ્વતભક્તયઃ ॥ ૪॥

અસ્તંગતા નિર્બલાશ્ચેત્ સબલશ્ચ રવિર્યદા ।
તદા રવિભવા જ્ઞેયા પ્રવ્રજ્યા દ્વિજસત્તમ ॥ ૫॥

જન્મભેશોઽન્યખેટૈશ્ચેદદૃષ્ટઃ શનિમીક્ષતે ।
તયોર્બલવશાત્તત્ર પ્રવ્રજ્યામાપ્નુયાન્નરઃ ॥ ૬॥

નિર્બલો જન્મભેશશ્ચેત્ કેવલેનાર્કિણેક્ષિતઃ ।
તદા શનિભવમેવ પ્રવ્રજ્યાં આપ્નુયાજ્જનઃ ॥ ૭॥

શનિદૃક્કાણસંસ્થે ચ શનિભૌમનવાંશકે ।
શનિદૃષ્ટે વિધૌ જ્ઞેયા પ્રવ્રજ્યા શનિસમ્ભવા ॥ ૮॥

કુજાદિષુ જયી શુક્રઃ સૌમ્યગો યામ્યગોઽપિ વા ।
જયી સૌમ્યગતશ્ચાન્યઃ પરસ્પરયુતૌ ભવેત્ ॥ ૯॥

પ્રવ્રજ્યાકારકઃ ખેટો યદ્યન્યેન પરાજિતઃ ।
તદા લબ્ધાં પરિવ્રજ્યાં પરિત્યજતિ તાં પુનઃ ॥ ૧૦॥

બહવો જન્મકાલે ચેત્ પ્રવ્રજ્યાકારકા ગ્રહાઃ ।
બલતુલ્યાસ્તદા તત્ર પ્રવ્રજ્યા કતમા ભવેત્ ॥ ૧૧॥

બહવો બલિનશ્ચેત્ સ્યુઃ પ્રવ્રજ્યાકારકા ગ્રહાઃ ।
તદા પ્રાપ્નોતિ સર્વેષાં તેષાં પ્રવ્રજ્યકાં ધ્રુવમ્ ॥ ૧૨॥

તત્તદ્ગ્રહદશાકાલે પ્રવ્રજ્યાં યાતિ તદ્ભવામ્ ।
ત્યક્ત્વા ગૃહીતપૂર્વાં તામન્યાં પ્રાપ્નોતિ માનવઃ ॥ ૧૩ ॥

દૃષ્ટેષ્વિન્દ્વિજ્યલગ્નેષુ શનિના નવમે ગુરુઃ ।
રાજયોગેઽત્ર જાતોઽસૌ તીર્થિકૃન્નાઽત્ર સંશયઃ ॥ ૧૪॥

ધર્મસ્થાનગતે મન્દે ગ્રહદૃષ્ટિવિવર્જિતે ।
રાજયોગેઽત્ર યો જાતઃ સ રાજા દીક્ષિતો ભવેત્ ॥ ૧૫॥

---

## અથ સ્ત્રીજાતકાધ્યાયઃ ॥ ૮૦॥

બહુધા ભવતા પ્રોક્તં યજ્જાતકફલં મુને ।
તન્નારીણાં કથં જ્ઞેયમિતિ મે કથયાઽધુના ॥ ૧॥

સાધુ પૃષ્ટં ત્વયા વિપ્ર તદપિ પ્રવદામ્યહમ્ ।
સ્ત્રીણાં પુંભિઃ સમં જ્ઞેયં ફલમુક્તં વિપશ્ચિતા ॥ ૨॥

વિશેષસ્તત્ર યો દૃષ્ટઃ સંક્ષેપાત્ કથયામિ તત્ ।
લગ્ને દેહફલં તસ્યાઃ પઞ્ચમે પ્રસવસ્તથા ॥ ૩ ॥

સપ્તમે પતિસૌભાગ્યં વૈધવ્યં નિધને દ્વિજ ।
સ્ત્રીણામસમ્ભવં યદ્યત્ તત્ફલં તત્પતૌ વદેત્ ॥ ૪॥

લગ્નેન્દ્ર્વ સમભે યસ્યાઃ સા નારી પ્રકૃતિસ્થિતા ।
કન્યોચિતગુણોપેતા સુશીલા શુભલક્ષણા ॥ ૫॥

શુભેક્ષિતૌ સુરૂપા ચ સદા દેહસુખાન્વિતા ।
વિષમે પુરુષાકારા દુઃશીલા પાપવીક્ષિતૌ ॥ ૬॥

પાપાઢ્યૌ ચ ગુણૈર્હીના મિશ્રે મિશ્રફલં વદેત્ ।
લગ્નેન્દ્વોર્યો બલી તસ્ય ફલં તસ્ય વિશેષતઃ ॥ ૭॥

લગ્નેન્દ્વોર્યો બલી વિપ્ર ત્રિંશાંશૈસ્તદધિષ્ઠિતૈઃ ।
ગ્રહરાશિવશાદ્ વાચ્યં ફલં સ્ત્રીણાં વિશેષતઃ ॥ ૮॥

કન્યૈવારગૃહે દુષ્ટા ભૌમત્રિંશાંશકે ભવેત્ ।
કુચરિત્રા તથા શૌક્રે સમાયા બોધને સ્મૃતા ॥ ૯॥

જૈવે સાધ્વી શનૌ દાસી જ્ઞર્ક્ષે કૌજે છલાન્વિતા ।
શૌક્રે પ્રકીર્ણકામા સા બૌધેંઽશે ચ ગુણાન્વિતા ॥ ૧૦॥

ક્લીબાઽર્ક્યંશે સતી જૈવે કૌજૈ દુષ્ટા સિતર્ક્ષકે ।
શૌક્રે ખ્યાતગુણા બૌધે કલાસુ નિપુણા ભવેત્ ॥ ૧૧॥

જૈવે ગુણવતી માન્દે પુનર્ભૂશ્ચન્દ્રભે તતઃ ।
સ્વતન્ત્રા કુજાત્રિંશાંશે શૌક્રે ચ કુલપાંસના ॥ ૧૨॥

બૌધે શિલ્પકલાઽભિજ્ઞા જૈવે બહુગુણા શનૌ ।
પતિઘ્ની ચાર્કભે કૌજે વાચાલા ભાર્ગવે સતી ॥ ૧૩॥

બૌધે પુંશ્ચેષ્ટિતા જૈવે રાજ્ઞી માન્દે કુલચ્યુતા ।
કૌજે બહુગુણાઽર્યર્ક્ષે શૌક્રે ચાપ્યસતી મતા ॥ ૧૪॥

બૌધે વિજ્ઞાનસંયુતા જૈવેઽનેકગુણાન્વિતા ।
માન્દે ચાલ્પરતિઃ પ્રોક્તા દાસી કૌજે તથાઽર્કિભે ॥ ૧૫॥

સુપ્રજ્ઞા ચ ભવેચ્છૌક્રે બૌધે દુઃસ્થા તથા ખલા ।
જૈવે પતિવ્રતા પ્રોક્તા માન્દે નીચજનાનુગા ॥ ૧૬॥

મન્દે શૂન્યે શુભાદૃષ્ટે પતિઃ કાપુરુષો ભવેત્ ।
ચરભે ચ પ્રવાસી સ્યાત્ ક્લીવસ્તત્ર જ્ઞમન્દયોઃ ॥ ૧૭॥

સૂર્યેઽસ્તભે પતિત્યક્તા બાલ્યે ચ વિધવા કુજે ।
શનાવશુભસન્દૃષ્ટે યાતિ કન્યૈવ વૃદ્ધતામ્ ॥ ૧૮॥

વિધવાસ્તગતૈઃ પાપૈઃ સૌમ્યૈસ્તુ સધવા સતી ।
મિશ્રખેટૈઃ પૂનર્ભૂઃ સા જ્ઞેયા મિશ્રફલાન્વિતા ॥ ૧૯॥

મિથોંઽશસ્થૌ સિતારૌ ચેદન્યાસક્તા તદાઽઙ્ગના ।
સપ્તમે ચ સ્થિતે ચન્દ્રે તદા ભર્તુરનુજ્ઞ્યા ॥ ૨૦॥

શુક્રભે શનિભે વાપિ સેન્દુશુક્રે ચ લગ્નગે ।
માત્રા સહ તદા નારી વન્ધકી ભવતિ ધ્રુવમ્ ॥ ૨૧॥

કુજર્ક્ષે વા તદંશેઽસ્તે સ્ત્રીલોલઃ ક્રોધનઃ પતિઃ ।
બૌધર્ક્ષાંશે તથા વિદ્વાન્ કલાસુ નિપુણઃ સુધીઃ ॥ ૨૨॥

જૈવે સર્વગુણોપેતઃ પતિરસ્તે જિતેન્દ્રિયઃ ।
શૌક્રે સૌભાગ્યસંયુક્તઃ કાન્તઃ સ્ત્રીજનવલ્લભઃ ॥ ૨૩॥

સૌરેર્ક્ષ વાથ સૌરાંશે વૃદ્ધો મૂર્ખશ્ચ સપ્તમે ।
અતીવામૃદુરર્કાંશે તદૃક્ષેવાઽતિકર્મકૃત્ ॥ ૨૪॥

અસ્તે કર્કે તદંશે વા કાન્તઃ કામી મૃદુઃ પતિઃ ।
મિશ્રે મિશ્રફલં વાચ્યં ભાંશયોશ્ચ બલક્રમાત્ ॥ ૨૫॥

સૂર્યેઽષ્ટમગતે જાતા દુઃખદારિદ્ર્યસંયુતા ।
ક્ષતાઙ્ગી ખેદયુક્તા ચ ભવેદ્ધર્મપરાઙ્મુખી ॥ ૨૬॥

ચન્દ્રેઽષ્ટમગતે નારી કુભગા કુસ્તનો કુદૃગ્ ।
વસ્ત્રાભરણહીના ચ રોગિણી ચાતિગર્હિતા ॥ ૨૭॥

કુજેઽષ્ટમગતે બાલા કૃશાઙ્ગી રોગસંયુતા ।
વિધવા કાન્તિહીના ચ શોકસન્તાપદુઃખિતા ॥ ૨૮॥

બુધેષ્ટમગતે જાતા ધર્મહીના ભયાતુરા ।
અભિમાનધનૈર્હીના નિર્ગુણા કલહપ્રિયા ॥ ૨૯॥

ગુરાવષ્ટમગે બાલા વિશીલા સ્વલ્પસન્તતિઃ ।
પૃથુવાદકરા પત્યા ત્યક્તા બહ્વશના ભવેત્ ॥ ૩૦॥

શુક્રેઽષ્ટમગતે જાતા પ્રમત્તા ધનવર્જિતા ।
નિર્દયા ધર્મહીના ચ મલિના કપટાન્વિતા ॥ ૩૧॥

શનાવષ્ટમગે જાતા દુઃસ્વભાવા મલિમ્લુચા ।
પ્રવંચનપરા નારી ભવેત્ પતિસુખોજ્ઝિતા ॥ ૩૨॥

રાહાવષ્ટમભાવસ્થે કુરૂપા પતિવર્જિતા ।
કઠોરહૃદયા રોગૈર્યુક્તા ચ વ્યભિચારિણી ॥ ૩૩॥

શશિશુક્રૌ યદા લગ્ને મન્દરાભ્યાં યુતૌ તદા ।
બન્ધ્યા ભવતિ સા નારી સુતભે પાપદૃગ્યુતે ॥ ૩૪॥
કુજાંશેસ્તગતે સૌરિદૃષ્ટે નારી સરુગ્ભગા ।
શુભાંશે સપ્તમે જ્ઞેયા સુભગા પતિવલ્લભા ॥ ૩૫॥
બુધભે લગ્નગે સૂતૌ ચન્દ્રશુક્રયુતે દ્વિજ ।
જ્ઞેયા પિતૃગૃહે નારી સા સર્વસુખસંયુતા ॥ ૩૬॥
લગ્ને ચન્દ્રજ્ઞશુક્રેષુ બહુસૌખ્યગુણાન્વિતા ।
જીવ તત્રાતિસમ્પન્ના પુત્રવિત્તસુખાન્વિતા ॥ ૩૭॥
લગ્નાદષ્ટમગૌ સ્યાતાં ચન્દ્રાર્કૌ સ્વર્ક્ષગૌ તદા ।
બન્ધ્યાઽથ કાકબન્ધ્યા ચેદેવં ચન્દ્રબુધૌ યદા ॥ ૩૮॥
શનિમઙ્ગલભે લગ્ને ચન્દ્રભાર્ગવસંયુતે ।
પાપદૃષ્ટે ચ સા નારી બન્ધ્યા ભવતિ નિશ્ચયાત્ ॥ ૩૯॥
સરાહૌ સપ્તમે સૂર્યે પઞ્ચમે પાપસંયુતે ।
શુક્રેજ્યરાહવો મૃત્યૌ મૃતાપત્યા ચ સા ભવેત્ ॥ ૪૦॥
શુક્રેજ્યાવષ્ટમે સારૌ સપ્તમે વા કુજો ભવેત્ ।
શનિના દૃગ્યુતો નારી ગલદ્ગર્ભા પ્રકીર્તિતા ॥ ૪૧॥
પાપકર્તરિકે લગ્ને ચન્દ્રે જાતા ચ કન્યકા ।
સમસ્તં પિતૃવંશં ચ પતિવંશં હિહન્તિ સા ॥ ૪૨॥
સસર્પાગ્નિજલેશર્ક્ષે ભાનુમન્દારવાસરે ।
ભદ્રાતિથૌ જનુર્યસ્યાઃ સા વિષાખ્યા કુમારિકા ॥ ૪૩॥
સપાપશ્ચ શુભૌ લગ્ને દ્વૌ પાપૌ શત્રુભસ્થિતૌ ।
યસ્યા જનુષિ સા કન્યા વિષાખ્યા પરિકીર્તિતા ॥ ૪૪॥
વિષયોગે સમુત્પન્ના મૃતવત્સા ચ દુર્ભગા ।
વસ્ત્રાભરણહીના ચ શોકસન્તપ્તમાનસા ॥ ૪૫॥
સપ્તમેશઃ શુભો વાપિ સપ્તમે લગ્નતોઽથવા ।
ચન્દ્રતો વા વિષં યોગં વિનિહન્તિ ન સંશયઃ ॥ ૪૬॥
લગ્ને વ્યયે સુખે વાપિ સપ્તમે ચાઽષ્ટમે કુજે ।
શુભદૃગ્યોગહીને ચ પતિં હન્તિ ન સંશયઃ ॥ ૪૭॥
યસ્મિન્ યોગે સમુત્પન્ના પતિં હન્તિ કુમારિકા ।
તસ્મિન્ યોગે સમુત્પન્નો પત્નીં હન્તિ નરોઽપિ ચ ॥ ૪૮॥

સ્ત્રીહન્ત્રા પરિણીતા ચેત્ પતિહન્ત્રી કુમારિકા ।
તદા વૈધવ્યયોગસ્ય ભઙ્ગો ભવતિ નિશ્ચયાત્ ॥ ૪૯॥

મિથોંऽશસ્થૌ મિથોદૃષ્ટૌ સિતાર્કી વા સિતર્ક્ષકે ।
ઘટાંશે લગ્નગે નારી પ્રદીપ્તં મદનાનલમ્ ॥ ૫૦॥

સંશાન્તિં નયતિ સ્ત્રીભિઃ સુખીભિર્મદનાતુરા ।
પરાભિઃ પુરુષાકારસ્થિતભિર્દ્વિજસત્તમ ॥ ૫૧॥

કુજજ્ઞગુરુશુક્રૈશ્ચ બલિભિઃ સમભે તનૌ ।
કુશલાऽનેકશાસ્ત્રેષુ સા નારી બ્રહ્મવાદિની ॥ ૫૨॥

ક્રૂરે સપ્તમગે કશ્ચિત્ ખેચરો નવમે યદિ ।
સા પ્રવ્રજ્યાં તદાપ્નોતિ પાપખેચરસંભવામ્ ॥ ૫૩॥

વિલગ્નાદષ્ટમે સૌમ્યે પાપદૃગ્યોગવર્જિતે ।
મૃત્યુઃ પ્રાગેવ વિજ્ઞેયસ્તસ્ય મૃત્યુર્ન સંશયઃ ॥ ૫૪॥

અષ્ટમે શુભપાપૌ ચેત્ સ્યાતાં તુલ્યબલૌ યદા ।
સહ ભર્ત્રા તદા મૃત્યું પ્રાપ્ત્વા સ્વર્યાતિ નિશ્ચયાત્ ॥ ૫૫॥

---

Encoded and proofread by ajarve at fms30.cca.rockwell.com (Ahto Jarve)

.. bRihatpArAsharahorAshAstram.h 71-80 ..
was typeset on August 2, 2016

Please send corrections to sanskrit@cheerful.com